रुद्रानुष्ठानपद्धतिः

पत्राणि ७१

శణపిశనిం మామన్రాష్ట్ర ... ఎంస్త్రక్షవేల

१४ सद्रपधंजी

रु० प०
१

श्रीरुद्राय नमः ॥ ॥ ब्रा ॥ नत्वा रामेश्वरसुतो नृहनारायणः कृती ब्राह्मणसंमतं त
नुते रुद्रानुष्ठानपद्धतिं ॥१॥ तत्र तावद्बह्वृचाद्यनेकासु यजुःशाखासु रुद्रः पठ्यते तथा
पि तैत्तिरीयशाखानुसारेण रुद्रप्रयोग उच्यते ॥ स्मार्त्तरुद्रप्रयोगस्य बौधायनसूत्र
मूलकत्वेन बह्वृचादीनां च ॥ तत्र बौधायनं स्नातकं बह्वृचादिभिरादरणादिति वाक्यानुसा
रेण बौधायनीयानुरोधित्वादिति ॥ इह च रुद्रानुष्ठाने त्रैवर्णिकानामेवाधिकारो न रम
स्त्रीशूद्रानुपनीतानां तेषां वैदिकमंत्रयुक्तकर्मण्यध्ययनाभावेन साक्षाद्वचना २
भावेन धिकारादिति ॥ चान्यत्र चैतद्विस्तरेण निर्णीतं ॥ तत्र रुद्रः पंचधा ॥ रूपं रुद्रीम्

घुरुद्रो महारुद्रोऽतिरुद्रश्चेत्येकादशगुणवृद्ध्या ॥ सर्वश्चैत्रेधा ॥ जपरुद्रो होमरुद्रो
भिषेकरुद्रश्चेति ॥ जपरुद्रोऽपि द्विधा केवलजपात्मको होमांगकश्चेति ॥ होमाभिषे
कयोस्तु केवलतदात्मकत्वमेव तत्र तावत्सापद्व ॥ यकामः श्रीरुद्रप्रीतिकामो वा उत्तरा
यणादौ गुरुशुक्रास्तबाल्यवार्धकादिरहिते शुभे काले शुक्लपक्षादौ रिक्तामाव्य
तीपातविष्ट्यादिदोषरहितायां द्वितीयादिरव्याध्यायशुभतिथौ चंद्रानुकूल्ये कृतमां
गलिकस्नानः शुचिः शुक्लवासाः सपत्नीको यजमानः पूजितेष्टदेवतो गोमयानुलि
प्ते शुचौ देशे प्राङ्मुख उपविश्य प्राणानायम्य देशकालौ संकीर्त्य मम कायिका दि

सर्वपापक्षयार्थं श्रीरुद्रप्रीत्यर्थं वा अमुकरुद्रमहं करिष्य इति संकल्पयेत् ॥ भु
क्तकामस्तु दीर्घायुः सुभक्त सिद्ध्यर्थं महारुद्रमहं करिष्य इति महारुद्रमेव संकल्प
येत् ॥ मन्त्रवयस्तु रुद्रकरणे तु मन्त्रवयस्तमुखं रुद्रं करिष्य इति शेषः ॥ एवं प्रधानसं
कल्पं विधाय अस्मिन् कर्मणि निर्विघ्नसमाप्तिसिद्ध्यर्थं गणपतिपूजनं ॥ पुण्याह
वाचनं मातृकापूजनं नान्दीश्राद्धमाचार्यादिवरणं च करिष्य इति संकल्पयेत् ॥ प्रत्ये
कं वा संकल्पः ॥ ततः षोडशभिः पंचभिर्वोपचारैर्गणेशं पूजयित्वा कलशपूजां पूर्व
कं ॥ अवनिकृतजानुमंडल इत्याद्याश्वलायनगृह्यपरिशिष्टोक्तविधिना पुण्याहं

2

वाचयित्वा गौर्य्यादि षोडश ब्राह्म्यादि सप्त मातॄः पूजयेत् ॥ तत्र ॥ गौरी पद्मा शची मेधा
सावित्री विजया जया ॥ देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥ धृतिः पुष्टिः स्तथा
तुष्टिः रात्मनः कुलदेवतेति ॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥ वाराही च तथे
न्द्राणी चामुण्डा सप्त मातरः इति च एतासां पदार्थानुसमयेन पूजा ॥ सर्वत्र चावाहनपूजा
दौ पूजने चावाहनादि विसर्जनान्तं कुर्यात् ॥ प्रतिमा पूजने त्वावाहन विसर्जने न स्तः
ततः शान्तं सुवृत्तं वेदविदं कुटुंबिनमाचार्य्यममुकप्रवरोपेतामुकगोत्रामुकशर्माण
ममुकप्रवरोपेता ॥ मुकगोत्रममुकशर्माणमाचार्यत्वां वृण इति ॥ वृणुयादृत्विये

3

त्वमुकवर्म्मेति ॥ वेदेपत्वमुकगुमइति ॥ ततः प्रार्थनं ॥ आचार्य्यस्तु यथास्वर्गेशक्रादीनां
बृहस्पतिः ॥ तथात्वं मम यज्ञेस्मिन्नाचार्य्यो भव सुव्रतेति ॥ एवमेव ब्रह्माणं हृत्वा प्रार्थयेत्
यथाचतुर्मुखो ब्रह्मा सर्वलोकपितामहः ॥ तथात्वमममयज्ञेस्मिन् ब्रह्माणंत्वामहंवृणे
इति ॥ जपहोमादिकंतुस्वयमेवकुर्य्यात् ॥ स्वाम्याशक्तौस्वप्रतिनिधित्वेनजपाद्यर्थंब्रा
ह्मणान् वृणुयात् ॥ छत्रकामस्तुऋत्विजोहृत्वाप्रत्येकंप्रार्थयेत् ॥ भगवन्सर्वधर्मज्ञसर्व
धर्मभृतांवर ॥ विततेममयज्ञेस्मिन् ऋत्विक्त्वंममसुव्रतेति ॥ ततः सदस्यंवृणुयात् ।
सर्वकर्मणामुपद्रष्टाभवेतिप्रार्थयेच्च ॥ तत्ररूपेणैकेनैवरुद्रजपेलघुरुद्रेमहारुद्रेप्येक

कादशाबा॥ इतिरुद्राएकादशाएकविंशाम्नुत्तरं शतं वेति॥ कलिकर्मसंख्याश्चेति नि
धिपद्धेलनियमइतिसांप्रदायिकाः। स्वपद्धेस्मद्गुरुद्भःजपाद्यर्थत्वेनैषांवरणंका
र्यं॥ यथा॥ रुद्रजपार्थंब्राह्मणावरणात्पूर्वंस्वपद्धजपार्थम्‌ नियमेनैकंद्वौत्रीन्वाविप्रान्वृ
णुयात्‌॥ तत्राचार्यादीन्मधुपर्केणार्हयित्वावरणाङ्कारादितिःदुर्जयेत्‌॥ स्मार्तेमधु
पर्कंकेचिन्नेच्छंति॥ इतिनिषिद्धेनजपाद्यर्थवरणेच आदिद्दजेवनमधुपर्कः॥ यथा
चार्यादयः॥ शिवायतनादौप्रभुपादनाद्यादितीर्थतीरेगोष्ठादिप्रभुपदेशेब्राह्मणगृहेयज
मानगृहेनदीस्नानदिग्भागेवाश्वचोदेशेत्मामण्डपःस्मरंजपादिकर्युः। स्वपद्धेपस्म

रु०प०
४

माणाग्रहमंत्रजपप्रभृत्यस्मरंरुद्रजपःकार्यः॥ तत्रषडंगाणांप्रत्येकमष्टोत्तरंसहस्रंशतं
वासंख्या॥ ॥अथरुद्रजपादौन्यासविधिः॥ तत्रबोधायनमतेपंचांगन्यासाः॥
तत्रशिखाद्यस्त्रांतमेकत्रिंशदंगन्यासः॥ प्रथमःमूर्धादिपादांतंदशांगन्यासो द्वितीयः
पादादिमूर्धांतंपंचांगन्यासस्तृतीयः॥ गुह्यादिमस्तकांतंपंचांगन्यासःचतुर्थः॥ हृद
याद्यस्त्रांतंपंचांगन्यासः॥ शातातपमतेतुब्रजननादिसर्वांगपर्यंतंषोडशांगन्यासः
षष्ठःसर्वत्रजपादौ॥ अभिषेकएवायंषष्ठोनान्यत्रेतिबोधायनः॥ तेषांप्रकारः॥ यातेरु
द्रेतिशिखायामस्मिन्महत्यर्णवइतिशिरसिसहस्राणीतिललाटे॥ हंसःशुचि

राम
४

षडिति भ्रुवोर्मध्ये त्र्यंबकं यजामहे इति नेत्रयोर्नमः स्रुत्यायेति कर्णयोर्मानस्तोक
इति नासिकायामवतत्येति मुखे नीलग्रीवो हेल्कंठे नमस्त आयुधायेति बाह्वोर्या ते हे
तिरिस्तुपबाह्वोर्येतीर्घानीति ॥ हृदयोः सद्योजातमिति पंचानुवाकान्पंच स्वंगुलीषु
नमो वः किरिकेभ्य इति हृदये नमो हिरण्यबाहव इति पार्श्वयोर्हिरण्यपाणे इति ना
भौ मीढुष्टमेति कट्यां ॥ ये भूतानामधिपतय इति गुह्ये सशिरा जातवेदा इत्यपाने
मानो महान्तमित्यूर्वोरेष त इति जान्वोर्ये पथामिति पादयोरध्ववोन्वदिति कवचं
नमो बिल्मिने इत्युपकवचं नमोस्तु नीलग्रीवायेति तृतीयं नेत्रं प्रमुंच धन्वन इत्य

रु० प०
५

स्त्रं य एतावंतश्चेति दिग्बंधं कुर्यादिति प्रथमः॥ ॐकारं मूर्ध्नि विन्यस्य नकारं नासिका
ग्रतः॥ मोंकारं तु ललाटे वै मकारं मुखमध्यतः॥ गकारं कंठदेशे तु वकारं हृदि विन्य
सेत् तेकारं दक्षिणे हस्ते रुकारं वामतोऽन्यसेत्॥ द्रकारं नाभिदेशे तु यकारं पाद
योर्न्यसेत्॥ ॐ मूर्ध्ने नमः इत्यादीनां न्यासः इति द्वितीयः॥ सद्यं
च पादयोर्न्यस्य वामं न्यस्योरुमूर्ध्नतः॥ अघोरं हृदि विन्यस्य मुखे तत्पुरुषं न्यसेत्
ईशानं मूर्ध्नि विन्यस्येति विन्यस्य दोःसु शिवात्मतां भावयित्वा करसंपुटं कृत्वा त्रीना राम ५
रसिंह्ज॥ त्वलोचनेत्रेषु गन्तः पंचाः मस्तु त्वं तं। नलायायाम्यानोनियुञ्जि र्वषट् सोमतमी।

शानमस्तेरुद्रास्मोनाष्टपृथिवींनीरुद्रादीनमस्कृत्वात्मरक्षांकार्येति ॥ अस्मिरुद्रास्मो
नाष्टपृथिवीस्सेतास्मांत्रातारस्मिंरुद्रमित्यष्टौमंत्रानुक्त्वेकंसंपुटीकृत्यपठेदितिचा
संसंपुटइतिकेचित्तुइतितृतीयः ॥ मनोज्योतिरबोध्यग्निः ॥ मूर्द्धानंमर्माणिजातवेदा
इतियुद्धास्मिहृदयस्तुरवशिरःस्तुविन्यस्यात्मरक्षांकर्त्तव्येतिचतुर्थः ॥ शिवसंकल्प
हृदयंपुरुषसूक्तंशिरउत्तरनारायणंशिखाअप्रतिरथंकवचंशतरुद्रीयमस्त्र
मितिपंचमः ॥ प्रजननेब्रह्मातिष्ठतु । पादयोर्विष्णुस्तिष्ठतु ॥ हस्तयोर्हरस्तिष्ठतु । बाह्वो
रिंद्रस्तिष्ठतु ॥ जठरेअग्निस्तिष्ठतु ॥ हृदयेशिवस्तिष्ठतु ॥ कंठेवसवस्तिष्ठतु । मुखेसरस्व

तीतिष्ठतु॥ नासिकयोर्वायुस्तिष्ठतु। नयनयोश्चंद्रसूर्यौ तिष्ठेतां। कर्णयोरश्विनौ
देवौ॥ तिष्ठेतां। ललाटे रुद्रस्तिष्ठतु॥ मूर्धन्यादित्यस्तिष्ठतु॥ पृष्ठे पिनाकी तिष्ठतु। पुर
तः शूली तिष्ठतु। पार्श्वयोः शिवशंकरौ तिष्ठेतां सर्वतो वायुस्तिष्ठतु बहिः। सर्वतो
ग्निज्वालामालापरिवृतस्तिष्ठतु। सर्वेष्वंगेषु सर्वा देवता यथास्थानं तिष्ठंतु। मां रक्षं
त्विति षष्ठः। अयं सर्वत्र ज्ञातातपमतो॥ न्यासनिषेक एव बोधायनमत इत्युक्तं॥ एषु
मासेषु शाखांतरे विशेषस्त्वकः। तद्यथा॥ प्रथमन्यासे हृदयानंतरं नमो गणेभ्यः इ
ति पृष्ठत इति॥ पार्श्वानंतरं विज्यं धनुरिति जवर इति जान्वनंतरं सः· स्पष्टजिदिति

6

जंघयोर्विश्वंभूतमितिगुल्फयोरिति ॥ प्रजननादिन्यासे च मूर्ध्न्यादिस्थानेतिष्ठंल्लिति

त्यनंतरंसिरसिमध्यपूर्वपश्चिमस्थत्वेशिखायांचामुंडातिष्ठल्लिति। न्यासानंतरंहिरण्य

गर्भोयःप्राणतो ॥ ब्रह्मयज्ञानां। महीद्यौ। उपश्वासयागेनयथाते। अग्नइममेलक्ष्मीँ ॐ म

न्त्रान्जपेत्। ततःअध्यात्मानमितिमादिनिध्यायेत् ॥ ततोदेवतछंदांसिस्मरेत् ॥ तदन

वेजपादेवैयथर्व्यस्मरणात्। तत्रसंयद्वपद्हेयथादिमंत्राणामृष्यादीनिप्रहस्यापन

प्रकारेणवक्ष्यमाणानिज्ञेयानि ॥ ततोरुद्रद्रष्ट्यादिस्मरेत् ॥ यथा। नमकानांप्रथ

मानुवाकेअघाघायाःकश्यपोद्वितीयायाःआत्रेयस्तृतीयायाःकश्यपस्ततोर्वर्गेगोत रुपि

रुद्रप.
७
7

मरुतस्तत एकस्याः क एवस्ततो द्वयोर्मरुतांस्तत एकस्या भगवांस्ततस्त्रिष्टुभां नारदस्त
तस्त्रिष्टुभां भगवान् द्वितीयानुवाकस्य मंडूकस्तृतीयानुवाकस्य भगवांश्चतुर्थानु
वाकस्य दुर्वासाः पंचमषष्ठानुवाकयोर्भगवान्सप्तमानुवाकस्य हेम ॥ शौनकोऽष्टमानु
वाकस्य नवमानुवाके च नमो वः इति यावत् भगवान् वसिष्ठस्याग्निर्दशमानुवाके
प्रथमस्य प्रजाहो द्वितीयस्य स्कंदस्ततो द्वयोर्मांडव्यस्तत एकस्य देवरादस्तत एकस्य राम
भगवांस्तत एकस्यास्त्रिस्तत एकस्य वैश्यापाद्यस्तत एकस्य भगवांस्तत एकस्य वैराजस्त ७
त एकस्य प्रजाहस्तत एकस्य नारदस्तत एकादशानुवाकस्याद्यानां चतुर्णां दुर्वासा

स्तत्वासमाप्तिर्देवता इत्यृषयः ॥ प्रथमानुवाके आद्यस्य रुद्रस्तत एकस्य शंभुस्त
त एकस्य स्कंदात्मा रुद्रस्ततो द्वयो रुद्रस्तत एकस्य शंभुस्ततो द्वयोरादित्यात्मा रुद्रस्त
त एकस्य शंभुस्ततस्तिसृणां रुद्रस्ततस्तिसृणां भगवांस्ततो द्वितीयतृतीयानुवाक
यो रुद्रश्चतुर्थपंचमषष्ठानुवाकानां शंभुः ॥ सप्तमानुवाकस्य रुद्रोऽष्टमानुवाकस्य न
मो वः ॥ किरिकेभ्यः ॥ इत्यंतस्य च नवमस्य भगवान्वसिष्ठस्य रुद्रो दशमानुवाके चतु
र्णां रुद्रस्तत एकस्य नंदीश्वरात्मा रुद्रस्तत एकस्य भगवांस्तत एकस्य शंभुः ॥ तत एकस्य
रुद्रस्तत एकस्य भगवांस्ततो द्वयोः शंभुस्ततो वशिष्टानी रुद्र इति देवताः ॥ प्रथमानुवा

रुद्रप०
७

8

केच्चाद्यमनुष्टुन्नीततएकाख्यागनुष्टुप्ततएकानिवृदनुष्टुप्ततएकानुष्टुप्त
ततएकानिवृदनुष्टुप्॥ततएकाच्चाफ्तारपङ्क्तिः पंचपदापंक्तिर्वाततएकाषट्पदाज
गतीततःसमानुष्टुन्नस्ततोष्टानुवाकायजूंषिततएकास्तारपङ्क्तिः पंचपदापंक्तिर्वात
तएकानुष्टुप्ततश्चतस्रोजगत्यस्ततस्तिस्रस्त्रिष्टुन्नस्ततएकापंचपदात्रिष्टुप्महाबृ
हतीवाततोद्वादश्यानुष्टुनंततोस्त्रीणियजूंषिस्ततस्तिस्रोनुष्टुन्नस्ततएकंयजुरितिछं राम
छंदांसिच्चय्यचमकानामग्निःकांडऋषिच्चाद्याच्चाग्नावैष्णवीगायत्री॥शिष्टानांवा ७
जादयोग्न्यादिविशेषादेवतायजुंजपेविनियोगः॥इतिएदंतंविधाययजमानाचार्य

त=२

क्षमसन्निधावृत्विग्भिः सावधानैः संलापांतरमकुर्वद्भिः श्रीरुद्रं ध्यायद्भिः यजमा
नस्य कामः सिध्यतामिति चिंतयद्भिश्च स्वरवर्णविवेकपूर्वं जपः कार्यः होमरुद्रे
क्रेणैवमेव होमः कार्यः॥ अनिषेकरुद्रेतु षष्ठमासानंतरं श्चभिर्मेवाचिश्रित इत्यादि
यथालिंगमंगानि संस्पृश्य पात्मानं महेश्वरूपं गंधपुष्पाक्षतधूपदीपैः प्रसन्नेः मा
नस्तोके वर्धार्याराध्मधाराधितो मनुष्येस्त्वमिति त्र्यंबकं यजामह इति चाल्पावदंतुह
रयः॥१ सचेतस इति सद्योजातं प्रपद्यामामीति च शिवमावाह्य सद्योजाताय वै नमो नम
इत्यासनं दत्वा भवे नातिभवे भजस्व मामिति पाद्यं दत्वा नवाक्ष्वामनमः इत्यापादिष्टे

रुद्रप
ए

9

तितिस्त्वन्निश्वस्नानं दत्वा भवं देवं तर्पयामि ॥ शर्वं देवं त ईशानं देवं त ॥ पशुपतिं देवं
त ॥ रुद्रं देवं त ॥ उग्रं देवं त । भीमं देवं तर्पयामि ॥ शर्वं देवं त महांतं देवं तर्पयामीति ॥ त
र्पयित्वा ज्येष्ठाय नमः इत्याचमनीयं ॥ दत्वा श्रेष्ठाय नमः इति मधुपर्कं कालाय नमः इति
गंधं कलविकरणाय नमः इति पुष्पं सर्वभूतदमनाय नमः इति धूपं ॥ मनोन्मनाय नमः
इति दीपं । भवोद्भवाय नमः इति नैवेद्यं । दत्वा तूष्णीमाचमनीयं दत्वाऽष्टौ पुष्पाणि । राम
भवादिनाम निर्भवाय देवाय नमः इत्येवमादि प्रयोगेण समर्प्य अघोरेभ्योऽथ घोरेभ्य ए
इति मंत्रयेणोपस्थाय हिरण्यरजतताम्रादिपात्रेण सततं धारया दुग्धादिनोदकेन

वा॥ निषिच्य पुनः पूजयेदिति॥ रुद्रजपादौ च सर्वसाधारण एष विधिः॥ रुद्रस्य न
मकाध्यायात्मकस्य स्वरूपमात्रजपादौ चमकाध्यायोपि सकृदावर्त्तनीयः॥ रुद्रज
पादौ तु प्रत्यावृत्त्येकैकश्चमकानुवाको योजनीयः॥ एतादृशपाठश्च रुद्राध्याय एकाद
शावृत्तौ लघुरुद्रः तदेकादशावृत्तौ महारुद्रस्तदेकादशावृत्तावतिरुद्रः संपद्य
ते तत्र जपे निषेके च नमो वः किरिकेभ्य इति सहस्राणि सहस्रश इति नमोऽस्तु रुद्रे
भ्यो ये पृथिव्यामिति चैते यथाध्ययनमेव पठनीया होमेषु विशेषो वक्ष्यते॥ रुद्र
स्य संकल्पादि ब्राह्मणभोजनपर्यन्तं यजमानाचार्य्यब्रह्मर्त्विजां नियमाः॥ हवि

ष्पभोजनंब्रह्मचर्यमधःशय्यापतिताद्यसंभाषणमक्रोधःशुचितेमादयोऽष्टव्याः
एवंयज्ञंसमाप्यहृदयादिभिरागुक्तंपंचांगंमासंजप्त्वारुद्रायजपंनिवेदयेत्॥ तत
स्तदंगहोमार्थंहोमकुंडेचप्रधानहोमार्थंमंडपंकुंडंचकार्यात्॥ इदंचवक्ष्यहोमांग
मेव॥ अवधानावश्यकंच॥ करणेफलाधिक्यं॥ तत्रमंडपोऽष्टहस्तोद्वादशहस्तोवाकनि
ष्ठोद्वादशहस्तश्चतुर्दशहस्तोवामध्यमः॥ षोडशहस्तोऽष्टादशहस्तश्चोत्तमः॥ सर्वे
चतुरस्राश्चतुर्द्वाराःकार्याः॥ तत्राष्टहस्तादिमंडपानांवक्ष्यमाणप्रकारेणप्राच्यादिसा
धनप्रकारःसमंसमचतुरस्रान्साधयित्वातन्मध्येनवधाविभागेनपातयित्वाबाह्येषुदश

10

शास्त्रज्ञसंपातेषुकादशस्तंभानालिखेत् ॥ चतुर्हस्तेषु दिक्षु विहस्तचतुरंगुलाधिक
विहस्ताष्टांगुलाधिकविहस्तविस्तृतानि द्वाराणि कर्तुं द्वारशाखास्तंभस्तंभयोर्वंधंक
र्मनिवेशयं ॥ एते च विंशतिस्तंभाः ॥ पंचहस्ताः कार्याः ॥ तेषां चोपरि चूडास्तु मरंध्रकाष्ठा
नि तिर्यक्देयानि ॥ द्वारसंमुखतया च हस्तमात्रा बहिः पूर्वादिद्वाराद्दक्षिणक्रमेण चत्व
रोंकुवरस्य द्वशाखाक्रान्तानि पंच षट् सप्त हस्तोच्छ्रायाणि ॥ अथ मध्यमेऽत्र मसं
डपेषु हस्तद्वयः सपादहस्तसार्द्धहस्तद्वयविस्तृतानि तोरणानि कार्याणि ॥ तोरणानां
चोपरि तिर्यक्फलकेषु द्वौ वकर्मला त्रिशूलाकाराः सपंचसप्तनवांगुलाः कनिष्ठ

मध्यमोत्रसमंमंडपेषुमध्येकिलानिखेयाः॥मध्यमसूत्रसंपातचतुष्टयेचाष्टहस्ता
ःश्चलास्तंभाःचूडास्तुतिर्यक्सूरंध्रकाष्ठसंवितानिखेयाः।मध्यभागेचसौदर्योर्ध्वस्तु
छ्रितंस्तंभंजेत्।सर्वेचस्तंभाःपंचमांशेनसूत्रसंपातस्थानाद्बहिर्निखेया॥मंडपस्योपरि
तश्चवाखर्जंयज्ञियवृक्षणादिनिर्मितकटादिभिश्छादनीयइति।मंडपेचमध्यमभागे
कुंडंकुर्यात्।मध्यभागएवकुंडमिति।साधितमन्यत्र।तत्रवक्ष्यमाणाग्रहरुद्रहोमा॥
हुतिसंख्याविशेषेणकुंडपरिमाणविशेषाउच्यंते।तत्रएकोनपंचाशदाहुतिप॥
र्यंतंस्थंडिलमेवच।तत्रअष्टादशांगुलादिपरिमाणंहस्तांतंचतुरस्रमंगुलोत्सेधंचतु

रंगुलोस्मेधंवा॥ पंचादशादिनवनवसाकृतिपर्यंतंमुष्टिमात्रंकुंडंलंतत्राघेको
नसहस्रपर्यंतमरत्निमात्रंकुंडंसहस्राघेकोनायुतपर्यंतंहस्तमात्रंचायुताघेको
नलक्षपर्यंतंद्विहस्तंलक्षादेकोनदशलक्षपर्यंतंचतुर्हस्तं॥ दशलक्षादेकोनकोटि
पर्यंतंषड्ढस्तं। कोटिमारभ्याधिकहोमेष्टहस्तं॥ तत्रैवाधिकतरहोमेदशहस्तमिति
केचित्कुंडानिचब्राह्मणक्षत्रियविशांचतुरस्रवृत्तचंद्रार्धनानिकार्याणि। सर्व
कार्यसिद्धिपुत्रसुखावाप्तिवैरिनाशशांतिमारणोच्छेदनदृष्टिरोगनाशनंत्वाभि
चारशांतिभूतोच्छादनादिदशविधकामनायांचतुरस्रंयोनिस्वार्धचांद्रत्र्यस्रवृत्त

रुद्रप०
२२

12

षडस्रपद्मश्चाष्टास्रमन्यास्त्रपंचास्त्राणि सर्वेषां कार्याणि काम्यस्य नित्यनैमित्तिकबा
धकत्वात् ॥ एतेषां चकरणप्रकारोन्यतोवगन्तव्यः । गौरवभयान्नेहोच्यते ॥ कुंडानां च
खननं हस्तमात्रं होमे पंचदशचतुर्विंशांशैः कार्यं । स्थूलजन्मेषु विस्तारसमं कार्यं
ततश्चतुर्विंशांशांकवंत्यक्त्वा नवनिश्चतुर्विंशांशैः मेखलात्रयं कुर्यात् । तत्र बहिर्मे
खलोत्सेधं विस्तारं द्वितीयातदुपरि त्र्यंगुलोत्सेधविस्तारा । तृतीयातदुपरि चतुरंगु राम
लोत्सेधविस्तारा ॥ ततः पश्चिमे मेखलोपरि कुंडविस्तारार्धदीर्घा कुंडविस्तारतृतीयां २२
शविस्तृतामश्वत्थदलाकारां कुंडचतुर्विंशांशाकृतमेखलां पश्चिमतः प्रविष्टनालां

ग्रासुन्नमतोमृत्तिंडकयमुतांकुंडमध्यप्रविष्टायांचतुर्विंशांशोत्सेधांपश्चात्तन्नतांयो
निंकृमितोरचयेत्॥तत्रचद्वितीयमेखलायांपरिधिपरिस्तरणार्थमंतरंरक्षेत्।ततः
कुंडमध्येकुंडचतुर्विंशांशाक्षयोन्नमांशाच्चतुष्टयविस्तृतंतत्कुंडाकारंपद्माकारं
वानाभिंकुर्यात्॥तत्रचयोनिकुंडेयोनिंपद्मकुंडेचनाभिंनकुर्यात्॥इहकुंडमेख
लायोन्यादौपद्मांतराणिगौरवभयान्नोक्तानिकुंडाद्याकारोनुएकहस्तादिप्रमाणंच
तुरस्रंतत्रवेदोमेस्थंडिलंकार्यं॥स्थंडिलेचमेखलादिवर्तुलाद्याकारताचनभवति।
त्र्यंगुलोत्सेधचतुरस्रत्वादीनांनैराकांक्ष्यादिरोधाद्वेतिसंक्षेपः॥ततोमंडपांतरीक्षा

रुद्रप० २२

13

नन्दागोरुद्रवेदिकांसप्तहस्तप्रोच्चयहस्तवेदिकांकुर्यात्॥तच्चदक्षिणतोग्रहस्तवेदि
काउत्तरतोरुद्रवेदिका॥ग्रहाणांपूर्वोगत्वेनप्राक्पूजनीयत्वेनयाम्यामरुद्रपूजायां
उत्तरक्रमसंस्थालीपाकह्वाणान्वैदिक्षुत्र्यंगुणालत्र्यंगुलोच्छ्रायत्र्यंगुलविस्तारवप्रत्रय
युतावप्रोपरिसमांगुलोच्छ्रायहस्तविस्तृताचसप्तहस्तमाणाकार्या॥सर्वेशांतिकपौष्टिका
नांग्रहमखविहितत्वात्॥एवंमंडपंकुर्यादिनिर्माययजपरुद्रजपांतेशुभेदहनिद्वो
मरुद्रेतुआचार्यादिपूजांतेशुभेकालेमंडपह्रजोगसुकृसंमायन्संस्नातःशु राम २२
क्लांबरःशुक्लमाल्यानुलेपनःसपत्नीकःसाचार्यर्त्विक्सोयजमानोमंगलघोषेण

संपूर्णकलशावाहनेनकंकर्णौनिरितिमंत्रघोषेणमंडपंप्रदक्षिणीकृत्यपश्चिमद्वा
रेणप्रविशेत्॥ततोमंडपांतःपश्चिमदेशउपविश्याचम्यदेशकालौस्मृत्वास्वयंब्राह्म
णद्वारावाकृतस्यमुकमंत्रजपांगत्वेनसमस्तपद्धोमाद्दशांशेनशतांशेनवावहस्रमा
णद्रव्येणमुकद्रव्येणाद्बाह्मणद्वारावायथाशक्तिहोमंक[redacted]रिष्येइतिजपरुद्रेसंक
ल्प्यचेत्॥ततोजपरुद्रेहोमरुद्रे[redacted]चगणेशपूजनंमंडपदेवतास्थापनादिच
करिष्येइतिसंकल्प्यषोडशोपचारैर्गणाधिपंसंपूज्यततोगौरसर्षपैःसर्वतोमंड
पांतरेवकिरेत्॥तत्रमंत्रः॥यदत्रसंस्थितंभूतंस्थानमाश्रित्यसर्वदा॥स्थानंसस्कान्तु

तत्सर्वं यत्र स्थितं तत्र गच्छतु ॥ अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशं ॥ सर्वेषामवि
रोधेन ब्रह्मकर्म समारभे इति ॥ ततः पंचगव्येन कुशैः सर्वत्र प्रोक्षणं कार्यं ॥ शुचीवो हव्ये
ति ऋचेनापो हि ष्ठेति ऋचेन च ततः कृतांजलिः स्वस्त्ययनं तार्क्ष्यमिति मंत्रं द्वयं जपेत् ॥ ५ ॥
॥ ॥ ततो वास्तुपूजनं ॥ ॥ आचार्यो वास्तुहोमार्थं मंडपे नैर्ऋते स्थंडिलं विधाय तत्
दीशानभागे हस्तमात्रां मृदा वेदीं विधाय ईशानादिकोणचतुष्के विशंतु भूतले नाग
लोकपालाश्च सर्वतः अस्मिन्मंडपे च तिष्ठंतु आयुर्बलकरा सदेति शंकूरोपयेत् ।
ततोऽग्निभ्योऽथ सर्पेभ्यो ये चान्ये तत्समाश्रिताः तेभ्यो बलिं प्रयच्छामि पुण्यमोदनमु

२

त्रममिति ॥ शंकुपार्श्वेमाषनक्रबलिंदद्यात् ॥ ततोवेद्यांवस्त्रेसुवर्णादिशलाकयान्
वरेखाः ॥ कुंकुमादिनाभागपरायताःकृत्वाहिरण्यपात्रेतुहुत्वालक्ष्मीर्विभूतिर्विमलाभि
या ॥ जयाकालाविशोकार्चेति ॥ नवदक्षिणोत्तरायताः ॥ तत्रामध्येकोष्ठचतुष्टयमे
कीकृत्यततःकोणेषुरेखांदद्यात् ॥ तेनार्धपदानिसंपद्यंते ॥ ततस्तत्रब्रह्मादीनामावा
वाहयेत् ॥ वास्तोश्चतुरस्त्रंशरीरंदेवाआक्रम्यस्थिताइतितत्रदेवपदेमतंदेवावाहनं ॥ त
त्रमध्यपदचतुष्केऽर्चयेद्ब्रह्माणंपूर्वपदद्वयेदक्षिणाग्रस्तनेऽर्यमा ॥ दक्षिणपदद्वयेजवर
दक्षिणेविवस्वान्पश्चिमपदद्वयेजवरवामेमित्रः ॥ उदकपदद्वयेवामस्तनेपृथ्वीधरः

15

आग्नेयपदार्धयोर्दक्षिणोत्तरयोर्दक्षिणहस्ते सावित्रसवितारौ ॥ नैरृतपदार्ध
योर्हृषणमैंद्रयोः विबुधाधिपजयौ वायव्यपदार्धयोर्वामहस्ते राजयक्ष्मरुद्रौ ईशा
नपदार्धयोरुरसि मुख्य—पावकसौ ॥ ईशानपदे दक्षिणार्धे शिरसि शिखी तद्दक्षिण
सार्धपदे दक्षिणनेत्रे जयंतः ॥ तद्दक्षिणसार्धपदे दक्षिणकूर्परेन्द्रशः तद्दक्षिणांशे
यपदार्धे दक्षिणप्रबाहावाकाशः ॥ तत्पश्चिमसार्धे दक्षिणप्रबाहावेव वायुः ॥ तत्पश्चि
मसार्धपदे दक्षिणमणिबंधे पूषा ॥ तत्पश्चिमपदद्वये दक्षिणपार्श्वे वितथः ॥ तत्पश्चि
मपदद्वये दक्षिणपार्श्वे एव गृहक्षतः ॥ तत्पश्चिमपदद्वये दक्षिणोरौ यमः ॥ तत्पश्चि

मपदद्वये दक्षिणजानौ गंधर्वः ॥ तद्धिपेमसार्धपदे वामस्फिचि दौवारि... महाराजं
घायां भृंगराजः ॥ तत्सामीपे नैर्ऋत्यपदार्धे दक्षिणस्फिचि भृंगः ॥ तदु...रार्धे पादयोः
पितरः तदुत्तरसार्धपदे वामस्फिचि दौवारिकः तदुत्तरपदद्वये वामजंघाताांसुग्री
वः ॥ तदुत्तरपदद्वये वामपार्श्वे असुरः ॥ तदुत्तरसार्धपदे वामपार्श्वे एव शोषः ॥ तदुत्तर
वायव्यपदार्धे वाममणिबंधे पापः ॥ तत्प्राक्पदार्धे वामप्रबाहौ रोगः ॥ तत्प्राक्सा
र्धपदे वामप्रबाहावेवाहिः ॥ तत्प्राक्पदद्वये वामकूर्परे मुख्यः तत्प्राक्पदद्वये वाम
बाहौ भल्लाटः ॥ तत्प्राक्सार्धपदे वामबाहावेव सोमः ॥ तत्प्राक्पदद्वये वामांसे सर्पः

तस्माकचसाद्वपदेवामश्रोत्रे दिति: तस्मागर्धपदेवामनेत्रे दिति:। ततउत्तरेवास्तोष्पतइ
तिवास्तु। ततईशान्यादिविदिक्षुचरकी॰ विदारी॰ पूतना॰ पापराक्षसः पूर्वादिदिक्षु
स्कंदार्यमजंभकपिलिपिञ्छाः ततोमंडलादीशानेकुंभंसंस्थाप्यवरुणंतत्राभ्यर्चयेत्।
ततआचार्योग्निस्थापनाद्याज्यभागांतंकृत्वोदुंबरादियज्ञियसमिभिस्तिलाज्यचरुद्रव्यै
रेकमष्टशतमष्टाविंशतिमष्टौवाप्रणवादिनमोंतंतन्नाममंत्रैर्जुहुयात्॥ब्राह्मणांवि
कल्पइतिपदार्थादर्शेततोवास्तोष्पतेप्रतिजानीह्यस्मानितिचतुर्भिर्वास्तोष्पते।क्रवा
स्थूणामसितिचतुर्वास्तोष्पतयेनमइतिवापंचबिल्वफलानि॥तद्बीजानिवमः।तस्य॥

ततः स्विष्टकृद्वर्णादिपूर्णाक्रियांतं तत्कलाब्धादिम्नः पायसेननाममंत्रैर्बलिंदत्वापापावमा
नेनराक्षोघ्नेनचरुकेमंडपंत्रिःसूत्र्यावेष्टयित्वाशांतिककलशोदकेयजमानमभिषि
च्यस्नापयेत् ॥ ततोयजमानउत्तरपूजांविधायदेवताविसर्जनब्राह्मणान्भोजयेदिति
एतावत्प्रशाक्तोबलिमात्रंदद्यात् ॥ चतएवमारदातिलकेपायसान्नैर्बलिर्हरेदिसेवो
क्तं ॥ नहोमादितिसांप्रदायिकाः ॥ तस्मिन्महोमंडलदेवतापूजनंबलिदानंसूत्रवेष्टनं
चेत्सनुष्ठानमिति ॥ ततःपूर्वस्यांदिशिमंडपद्वाराद्बहिर्हस्तमात्रेवर्तुलंतोरणमाश्वत्थंवा
हस्तनामकंप्रसुशोभननामकंवात्रिशूलचिह्नितंत्र्यग्निमीळेडरोहितमितितिधान

यसुष्टतोरणायतनमइतिनामस्वरूपेणगंधादिनाप्पूजयित्वाचंदनमालाभ्युष्यादिशो
शोभितंकुर्यात्॥ राज्ञस्वदस्मतं। तत्रमन्त्रमेव॥ तत्रैकःकलशःस्थाप्यःतत्रमंत्रः। मही।
द्यौरितिभूमिंस्पर्शंस्नात्वाऔषधयःसमितियवान्ह्रीसोत्वाकलशेक्षिपेतिआजिघ्र
कलशमितिवा। कलशंस्थापयित्वाइमंमेगंगेइतिजलेनापूर्यगंधद्वारामितिगंधंक्षि
प्त्वायाऔषधीरितिसर्वौषधीःक्षिपेत्॥ औषधयःसमितियवान्॥ कांडात्कांडादितिदू
र्वाःअश्वत्थेवइतिपंचपल्लवान्॥ नापृथिवीतिसप्तमृदोयाःफलिनीरितिफलं। स
हिरण्यानितिपंचरत्नानि॥ हिरण्यरूपइतिहिरण्यं। युवासुवासाइतिवस्त्रेणरक्तस्त

त्रेणाच्च मुखे वेष्टयेत् ॥ पूर्वस्मात् दर्वीस्तु परिधान्यपूर्वीर्णपात्रं न्यसेत् । तस्मिन् कलशोद्ध
वावाहनं पूजनं च ॥ ततो दक्षिणे औदुम्बरं रक्तं स्वंवास्तुनद्वं विकटं वा त्रिशूलचिह्नितं तो
रणं ॥ मिथिलो जर्कश्चेति निधानं यनाममंत्रेण पूर्ववत्संपूज्य पूर्ववद्गंधनादि चर्चितं स्र
खास्वर्णमंगारकं च तत्र न्यसेत् ॥ ततः पूर्ववद्देवकलशस्थापनं ॥ तत्र धरणीमावाहयेत्पू
जयेच्च ॥ ततः पश्चिमे ज्ञानंद्रं मोदुम्बरं वास्तु कर्मसूत्री मंवा त्रिशूलचिह्नितं तोरणमस्था
हीति मंत्रेण निधायनाम्नापूर्ववत्संपूज्य चंदनचर्चितं स्रक्लान्तकं बुधं च तत्र न्यसेत्
तत्र पूर्ववत्कलशस्थापनं ॥ तत्र वाक्पतिमावाहयेत् ॥ पूजयेच्च ॥ ततउत्तरे वाटमाध

हुंपालाशंवारुद्रंहांसुप्रमवात्रिशूलांकितंतोरणांश्चान्तोदेवीरितितिधायनाम्नापू
र्ववत्संपूज्यचंदनादिचर्चितंकलशं॥सोमकेतुशानिंस्तत्रन्यसेत्तत्रपूर्ववत्कलशस्थाप
नं॥विघ्नेशमावाहयेत्।पूजयेच्च।ततःपूर्वद्वारेकलशंन्यस्यप्रतिद्वारश्शासंमुदकचंद
नफलपंचमृत्तिकापंचपल्लवसर्वौषधीसुवर्णपंचरत्नादियुतंदध्यक्षतविभूषि।
तंवस्त्रपुष्पमालाचंदनचर्चितंवस्त्ररक्तसूत्रवेष्टिताननंपूर्ववन्मंत्रैःस्थापयेत्॥
प्रतिकलशंमंत्राहतिः॥ऐरावतंकलशाद्धयेन्मसेतृपूजयेच्च।ततःक्रमेणदिनाहविन्जे
पूर्वद्वारेश्वांतिस्तक्रजपार्घ्यंलेनलामदंहणेरुवेदः॥पद्मपत्राहेगायतम्मः सोमदै

वनः ॥ अत्रिगोत्रसत्त्वं विघ्नेंद्रस्कलिकल्वं मेमखेन वेति प्रत्येकं हत्वा त्रिमीले इति मंत्रे
णा प्रत्येकं गंधादिनिरुपचारैः पूजयेत् ॥ ततः सहस्राक्ष्मंमंत्रेरावणास्थितं पीतां कि
रीटं कुंडलधरं दक्षिणवामकरस्थवज्रोत्पलसिंद्धमाला ॥ ओं एह्येहि सर्वामरसिध
साध्यैरभिष्टुतो वज्रधरामरेश ॥ संवीज्यमानोऽप्सरसां गणेन रक्षाध्वरं नो नगवत्सम
स्तेनो इंद्र इहागच्छेदतिष्ठेनीद्रं सांगं सपरिवारं सायुधं सशक्तिकं वारकलशे आ
वाहयाम्यहंतिस्थान इति मंत्रेण पीतां पताकां पीतं च ध्वजं नयमपि पंचदलं दंडमुच्छ्
येत् ॥ तत्रचातारसिंद्रमितीद्रं पूजयेत् ॥ इंद्रं वो विश्वतस्परीति वा मंत्रः ॥ ततः इंद्रस्तु

रपतिःश्रेष्ठोवज्रहस्तमहाबलः॥शतयागाधिपोदेवतस्मैनित्यंनमोनमइतिनलात
त्रइंद्रायसांगायसपरिवारायसायुधायसशक्तिकायैतंमाषभक्तबलिंसमर्पयामी
तिबलिंसमर्पयेत्॥ततःश्चाचम्याग्नेयेगत्वापूर्ववत्कलशंस्थापयित्वापुंडरीकंचमृत
चतत्रपूजयित्वानंतरंछागस्यरक्तंदक्षिणवामकरद्वयंघृतंशक्तिकमंडलुंयज्ञोप
वीतिनमग्निंध्यात्वा॥ॐएह्येहिसर्वामरहव्यवाह्यमुनिप्रवरैरभितोभिजुष्ट॥तेजोव
ताल्लोकगणेनसार्द्धममाध्वरंपाहिकवेनमस्ते।ॐअग्नेइहागच्छइहतिष्ठइतिसांगंस
परिवारंसायुधंसशक्तिकमग्निंकलशेआवाह्यरक्तांपताकांरक्तंचध्वजंपंचहस्तं

दंडंमग्निइत मित्युच्छ्रयेत्॥ ततस्तं त्वोच्चयन्न इति मंत्रेणाग्निं गंधादिभिः पूजयित्वा॥ आ
ग्नेयः पुरुषो रक्तः सर्वदेवमयोऽव्ययः॥ धूम्रकेतु रजोध्यक्षस्तस्मै नित्यं नमो नमः॥ इ
ति नत्वा सांगायैतस्मा द्युल्का च्चयन्नयेणतं माषभक्तबलिं समर्पयामीति बलिं समर्पयेत्॥
ततः आचम्य दक्षिणगत्वा प्रतिहारशाखं चंदनोदकादिसुतं पूर्ववन्मंत्रैः कलशं
संस्थापयित्वा वामनन्नामकं दिग्गजं तत्रैन्यस्य पूजयेत्॥ ततो यजुर्वेदिना॥ हस्तिजो दक्षि
णद्वारे शांतिजपार्थं त्वेनत्वा मदं हृणो॥ कांतरा होयजुर्वेदस्त्रैष्टुभो विष्णुदेवतः॥ काश्यप
गोयस्तु विप्रेंद्र कलिकल्मषमखेनवेति॥ प्रत्येकं हत्वाईषेत्वोर्जेति गंधादिभिरुपचारैः

रुद्रप०
२०
20

पूजयेत् ॥ ततो महिषारूढं धृतदंडपाशं दक्षिणवामकरद्वयं कृष्णांजनचयोपमम
सितसमलोचनं स्मरं ध्यात्वा ॐ ह्रीं वैवस्वत धर्मराज सर्वामरैरर्चित धर्ममूर्ते ॥ शुभाशु
भानंदस्वधाम धीशाशीवाहन ॥ पाहि मां त्वं नमस्ते ॥ ॐ यम इहागच्छेह तिष्ठेति ॥ सांगा
दिमावाह्य कृष्णां पताकां कृष्णं च ध्वजं च्छायां गौरिति मंत्रेण छत्रं येत् ॥ ततो यमाय सोम
मिति मंत्रेण यमं गंधादिभिः पूजयित्वा ॥ महामहिषमारूढं दंडहस्तं महाबलं ॥ आ
वाहयामि यज्ञेस्मिन् पूजेयं प्रतिगृह्यतामिति ॥ तत्वा सांगायैतस्मा कृष्णाय मायैतं माषान्न
कबलिं समर्पयामीति बलिं दद्यात् ॥ ततश्चाचम्य नैऋत्यां पूर्ववत्कलशं संस्थापयित्वा

राम
२०

कुमुदं दुर्जयं च पूजयित्वा ततो नरारूढं महाकायं षड्हस्तं महाबलं ॥ नीलांबरा
हिसंवेष्टितं पीताननेरणान्भूषितं निकृतिं ध्मालां ॥ ॐ एह्येहि विघ्नेशगणनायकस्त्वं ॥ विघ्ना
न्वेतालपिशाचसंघैः समाधरं पाहि पिशाचनाथ लोकेश्वरत्वं भगवन्नमस्ते ॥ नोनि
रत्नेश्चहागच्छेहतिष्ठेतिसांगादिमावाह्य नीलां पताकां ध्वजं च मोक्षणाइतिमंत्रेणोच्छ्रित
समुच्चलंतमितिमंत्रेण मोक्षणं ईश्मनेनवानिर्ऋतिं ॥ गंधादिभिः पूजयित्वा निर्ऋतिं षड्
हस्तं च सर्वलोकैकपावनं ॥ आवाहयामि यज्ञेस्मिन्पूजेयं प्रतिगृह्यतामिति नित्वासो
गाद्येत्यादि ॥ निर्ऋतयेऽयं तं माषनक्तबलिं समर्पयामीति ॥ ततः स्वाचम्य ॥ पश्चिमतो रेक

लक्ष्याग्नेयंप्रतिद्वारस्याग्रबझ्र्वदक्षस्थापयित्वाश्चजनाख्यंदिग्गजंतत्रनमस्समपूजयेत्ततः।
तस्मात्सविदाहल्लिजोपश्चिमद्वारेशांतिसामजपार्श्वतलामहंहणेमामवेदान्तुपेंग
ह्रोजागतःशाक्तदैवतः॥नारदाजस्तुविघ्नेंद्रकलिलंमेमखेनवेतिङलेकुंहलाश्चय
च्चायादीतिगंधाद्युपचारैःपूजयेत्॥ततोमकरस्थंपाद्यादंसंस्तुंकवद्मंकिरीटधारि
णंवरुणंगांधमालांडैरघेहिक्रियादोगिणवारिधीनांगणेनंपजंनमस्समहासमेरौः॥विद्याधरेंद्रा
मरगीयमानपादिलमस्मानगवलमक्तेनेवरुणाइन्द्रागच्छेहतिष्ठेतिसांगादिमावा
ह्यस्वेतांपताकांध्वजंतन्डसंमेवरुणेस्तुच्छुयेत्॥तत्वायामीतिगंधादिनिर्वरुणंपूजयि

पाशहस्तंचवरुणमर्णसामतिमीश्वरंआवाहयामियस्नोस्मिन्वरुणायनमोनमइ
तिजलाशयंगायेसादिवरुणायेतंमाषभक्तबलिंसमर्पयामीतिबलिंदद्यात्॥ततःआ
चम्य॥वायव्यांधूम्रवर्णवल्कलांनिधायतत्रपुष्पादंतंसिधार्यंचसंधूम्रमृगाधिरूढंधूम्रव
र्णचित्रांबरधरंयुवानंकरध्वरधरदक्षिणवामहस्तद्वयंवायुंध्यात्वाॐएह्येहिप्रियतेसमम
रक्षणायमृगाधिरूढःसहसिद्धसंघैःप्राणाधिपःकालकवेःसहायगृहाणपूजांभग
वन्नमस्ते॥ॐवायोइहागच्छइहतिष्ठेतिसंगादिमावाह्यधूम्रांपताकांध्वजंचवायोरग
नमितिमंत्रेणोत्सृजेत्॥ततोवायव्यहतस्मतइतिवायुंगंधादिनिरभ्यर्च्य॥वायुमाकाश्यां

चैवपवनंवेदवर्जितं ॥ आवाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यतां । अनाकारोमहो
जाश्चयश्चाहष्टगतिर्दिवि ॥ नमस्तेपूज्यायजगतोवायवेदंनमामिचेति ॥ नत्वासांगाढ्ये
त्यादि ॥ वायवेएतंमाषनक्रबलिंदद्यात् ॥ ततआचम्योत्तरद्वारेकलशादयंप्रतिद्वारस्था
स्वंद्वायस्थापयित्वासार्वभौमंदिग्गजंतस्मिन्पूज्याथर्ववेदाहलिजौउत्तरद्वारेस्थां
त्रिजपार्थ्यलेनलामहंहणो ॥ ह्वह्लेचोथर्ववेदोनुष्टुप्नोरुद्रदेवतः ॥ वैशंपायनविप्रं
रुद्रस्कलिकूलंमेमखेनवेति ॥ प्रत्येकंहलाशालोदेवीरितिगंधाद्युपचारैःपूजयेत्
ततोनरस्युतविमानस्थंकुंडलहारकेयूरसुचिरंवरगदाधरदक्षिणावामसुजवयं

राम
२२

मुकुटिनंमहोदरंमहाकायंहरितवर्णंकुबेरंध्यात्वा॥ओंतुराध्योहियस्तेश्वरयज्ञरक्षां
विधस्वधनदस्वगणेनसार्धंसर्वैषधीभिःपितृभिःसहैवगृहाणपूजांभगवन्नमस्ते
ओंसोमसोमेहागच्छेहतिष्ठेतिसांगादिमावाह्यहरितांपताकांध्वजंच॥आप्यायस्वेति
छत्रयेत्॥सोमोधेनुमितिवयंसोमेतिवापूजयित्वासर्वनक्षत्रमध्येतुसोमोराजाव्य
वस्थितः॥तस्मैसोमायदेवायनक्षत्रपतयेनमइतिनत्वासांगायसोमादि॰सोमायैतं
माषभक्तबलिंसमर्पयामीतिबलिंदद्यात्॥ततःआचम्येशान्यांगत्वापूर्ववत्कलशं
निधायसुप्रतीकंदिग्गजंमंगलंचतत्रसंपूज्य॥वृषारूढंदंष्ट्रिणावामहस्तयोर्वरत्रि

शूलधरंत्रिनेत्रंशुक्लवर्णमीशानंध्याला॥ ॐएह्येहिविश्वेश्वरनस्त्रिशूलपाणखट्वांग
धरेणसार्धंलोकेनयज्ञेश्वरयज्ञसिद्धोगृहाणपूजांनगवल्लभस्ते॥ नोईशानइहाग
च्छेहतिष्टेतिसांगादिमावाह्यश्वेतांसर्ववर्णांवापताकांध्वजंच॥ अनिलादेवस्तविनि
रिमुञ्चयेत्॥ ततस्तमीशानमितिगंधादिभिरभ्यर्च्यहृषास्कंधसमास्हटशूलहस्तत्रि
लोचनत्वामावाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यतां॥ सर्वाधिपोमहादेवईशानःशु
भकृदीश्वरः॥ शूलपाणिर्विरूपाक्षस्तस्मैनित्यंनमोनमइति॥ नत्वासांगायेस्मादि॥ इशा
नायतंमाषनक्रबलिंसमर्पयामीतिबलिंदद्यात्॥ ततः आचम्येशानपूर्वयोर्मध्येऽ

धर्त्तिहृत्पद्मासनासीनं फणासप्तकमंडितं पद्मशंखधरोर्ध्वाधो दक्षिणकरद्वयं चक्र
गदाधरोर्ध्वाधोवामकरद्वयं नीलवर्णमनंतं ध्यात्वार्घ्यं एह्येहि पातालधरामरेंद्रनाग
गनाकिंनरगीयमानरक्षोरगेंद्रामरलोकसंघैः ॥ रनंतरक्षाध्वरमस्मदीयं ॥ नोच्चनंत
इहागच्छेह तिष्ठेति सांगादिमावाह्यामेघवर्णां श्वेतां वा पताकां ध्वजं चायं गौः स्थिरि
तिमंत्रेण छित्वायं गौरिति ॥ शेषगंधादि निरभ्यर्च्य ॥ योसावनंतरूपेण ब्रह्मांडस
चराचरं ॥ पुष्पवद्धारयेन्मूर्ध्नि तस्मै नित्यं नमोनम इति ॥ नत्वा सांगायेत्यादि ॥ अनंतायै
तं माषनक्कं बलिं समर्पयामीति बलिं समर्पयेत् ॥ रूपनारायणमते नैर्ऋत्यपश्चिम

योर्मध्ये नंतमूजा॥ ततश्चाचम्य पश्चिमनैर्ऋतकलसमध्ये ऊर्ध्वमुखं हिरण्यपाद्मस्थं त्रक्रशाम्
श्रुधरोर्ध्वाधोदक्षिणकरं स्रुक्स्रुवमंडलुधरोर्ध्वाधोवामकरद्वयं चतुर्मुखं श्मश्रुलं जटि
लं लंबोदरं रक्तवर्णं ब्रह्माणं ध्यात्वा॥ एह्येहि सर्वाधिपते सुरेंद्र लोकेन सार्धं पितृदेव
ताभिः सर्वस्य धातारमितप्रभावो विशाध्वरं नः सततं शिवाय॥ नो ब्रह्मन्निहागच्छेहति
ष्ठेति ब्रह्माणं॥ सांगादिमावाहरक्तां पताकां ध्वजं च ब्रह्मयज्ञानमिति न्यस्य तेनैव ब्रह्मा
णं गंधादिभिरभ्यर्च्य पद्मयोनिश्चतुर्मूर्त्तिर्वेदावासः पितामह॥ यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै
नित्यं नमो नम इति॥ नत्वासीगायेत्यादि॥ ब्रह्मणे इमं माषभक्तबलिं समर्पयामीति ब

लिंदद्यात्॥ ॐ नमोभुस्पोनापृथिवीतिमंत्रेणपृथिवींपूजयंति॥ तेनैवचध्वजपताकास्था
पनंकुर्वीत॥ ॐ रूपनारायणमतेईशानपूर्वयोर्मध्येब्रह्मापूजनं। ततः ॐ आब्रह्मन्मंडपम
ध्ये ॐ अमुष्यदंडोदरादस्मद्दीर्घोच्चिदस्तिविसृतोमहाध्वजोविचित्रवर्णइंद्रस्यहृष्मइति
स्यापः। ब्रह्मयज्ञानमितिचमंत्रेणब्रह्मपूजनंकार्यं॥ ततोमंडपषोडशास्तंभेषुसर्वेभ्यो
देवेभ्योनमः। वंशेभ्यःकिंनरेभ्योनमः॥ श्रेष्ठपंन्नगेभ्योनमइतिपूजयेत्॥ ततःपूर्वस्यांकि
चिद्भूमिमुपलिप्यतत्रोपविश्यमंत्रैर्लोकेयानिभूतानिस्थावराणिचराणिचब्रह्मविष्णु
शिवःसार्धंरक्षांकुर्वंतितानिमे॥ देवदानवगंधर्वापिशाचोरगराक्षसाःपन्नगाः। स्क

रुद्रप
२५

25

षष्ठोमानवागावोदेवमातरएवच॥सर्वेभ्यमाध्वरेरक्षांप्रकुर्वंतुमुदान्विताः॥ब्रह्मावि
ष्णुश्चरुद्रश्चदेवेन्द्रपालागणैःसह।रक्षंतुमंडपंसर्वेघ्नंतुरक्षांसिसर्वतः।त्रैलोक्यस्थम
स्थावरेभ्योभूतेभ्योनमः त्रैलोक्यस्थेभ्यः स्थावरेभ्योभूतेभ्योनमः॥ॐब्रह्मणेनमः॥विष्णवेन
मः॥शिवाय॰देवेभ्यो॰गंधर्वेभ्यो॰यक्षेभ्यो॰राक्षसेभ्यो॰पन्नगेभ्यो॰ऋषिभ्यो॰मनुष्ये।
भ्यो॰गोभ्यो॰देवमातृभ्योनमइतिप्रत्येकंसंपूज्यपुष्पादिनासर्वमंत्रैरेवतस्मात्समावे
तेभ्यएवमाषनक्तबलिदिग्विदिक्षुदद्यात्॥ततोयजमानःसाचार्यःस्वकुलिकप्रक्षालितपाद राम २५
पाणिराचांतःपश्चिमद्वारेणमंडपंप्रविशेत्।ततोयजमानोभ्यायतनादक्षिणतउपविशे

अत्र पाठस्त्रुटितः

जे

तु॥ आचार्यस्तु कुंडस्य पश्चिमत उपविश्याचम्य॥ प्राणानायम्य अमुककर्म्मण्यस्मिंप्र
तिष्ठांकरिष्ये॥ तदंगतया संमौंन मेखलायोनिदेवतास्थापनपूजनादि करिष्य इति
संकल्प्याग्न्यायतनं संमृज्य कुशोदकेन प्रोक्ष्य इदं विष्णुरिति मंत्रेणोपरि मेखलायां
श्वेतवर्णालंकृतायां विष्णुमावाह्य पूजयेत्॥ मध्यमेखलायां रक्तवर्णालंकृतायां ब्र
ह्मयज्ञानमिति ब्रह्माणं॥ अधोमेखलायां कृष्णवर्णयुतायां कद्रुद्रायेति रुद्रं॥ योन्यांत्व
म्निलादेवसवितः॥ इषे इंद्रः इंद्रंवो मधुच्छंदा॥ इंद्रो गायत्री॥ इंद्रो देवो विश्वतः॥ आग्नेय्याम
ग्निः काण्वो मेधातिथिरग्निर्गायत्री च निलादेवसवितास्मिं हुतं॥ दक्षिणे यमः॥ यमायस्वे

मंयमोयमोऽनुष्टुप्यमायसोमं॥निऋत्यांनिऋति।मोध्रुणोघोरेःकएवोनिऋतिर्गाय
त्री।मोघृणाःपरापरा।पश्चिमेवरुणं।तत्त्वायामिशुनश्शेपोवरुणः॥त्रिष्टुप्।तत्त्वाया
मिवायव्यांवायुः॥वायोःशतंवामदेवोवायुरनुष्टुप्वायोशतं।वायुसोममध्येष्टौवसवः
ज्यायाश्चत्रमैत्रावरुणौवशिष्ठोवसवस्त्रिष्टुप्ज्यायाश्चत्र।सोमेशानमध्ये।एकादशारु
द्राः।आरुद्रासः।श्वेताश्वएकादशारुद्राजगती॥आरुद्रासः।ईशानेंद्रमध्येद्वादशादित्या
त्यान्नुसामदेवस्सोद्वादशादित्यागायत्री।त्यान्नुक्षत्रियान्॥इंद्राग्निमध्येश्विनोश्च
श्विनावर्त्तिरास्कृगणोगोतमोश्विनावृष्णिकश्चाश्विनावर्त्ति॥अग्नियममध्येविश्वेदेवाः।स

पेत्रकः उमासोमधुहृदा विश्वेदेवा गायत्री ऋतुमासः यमनिर्ऋतिमध्ये समयज्ञाः अग्नि
र्लदेवं वामदेवः। समयज्ञाः प्रजातिः॥ अनिलं वा निर्ऋतिः वरुणयोर्मध्ये नूतनागाः। आ
यंगोः सर्पाज्ञी सर्पा गायत्री आयंगौः वरुणवायुमध्ये गंधर्वाप्सरसः॥ अप्सरसायेनस
प्तशृंगो गंधर्वाप्सरसोऽनुष्टुप्। अप्सरसां गंधर्वाणां ब्रह्मसोममध्ये स्कंदं॥ नंदीश्वरं शूल
महाकालं च। कुमारं माता त्रिष्टुप् ऋषभन सृषभनो वैराजो ऋषभनोऽनुष्टुप्॥ ऋषभनेमात्र दि
ति र्लोकपाहृदस्पति शूलमहाकालो गायत्री अदिति र्घ्यानिष्ठः ब्रह्मेशानमध्ये दक्षादि
सप्तकोगणाः॥ अदितिर्लोकपाहृदस्पतिर्दक्षोऽनुष्टुप्॥ अदिति घज निष्ठ ब्रह्मेन्द्रमध्ये

दुर्गा विष्णुश्च । नामग्निवर्णां सोमरि दुर्गा त्रिष्टुप् नामग्निवर्णां ॥ इदं विष्णुः कण्वो मेधाति
थिर्विष्णुर्गायत्री इदं विष्णुः ॥ ब्रह्माग्निमध्ये स्वधा ॥ उदीरतां शंखः स्वधा त्रिष्टुप् ॥ उदीर
तामवरः ब्रह्मयमयोर्मध्ये मृत्युरोगाः ॥ परं मृत्यो संकुसुको मृत्युरोगास्त्रिष्टुप् परं मृत्यो
ब्रह्मनैरृत्यसोमध्ये गणपतिः ॥ गणानां त्वा यस्समदो गणपतिर्जगती गणानां त्वा ब्रह्मण
स्पणयोर्मध्ये श्चापः शं नो देवी शंबरीषा जिद्वांतुर्दीप श्चापो गायत्री शं नो देवी ब्रह्मवा
युमध्ये मरुतः मरुतो यस्य राकुगणो मरुतो गायत्री मरुतो यस्य हि ब्रह्मणः पादस्मृ लोक
र्णीका ष्टधी स्योना मेधातिथिर्भूमिर्गायत्री स्योना पृथिवी तत्रैव गंगादिनद्यः ईमं मे गंगे

सिंधुर्हिमस्त्रैयमेधो गंगायमुनासरस्वत्योजरानीः इमं मे [illegible] गंगेतवैवस
मसागराः धात्रोधरन्त्रो गोतमो वामदेवो सगरात्नुष्टुप् धात्रो धान्त्रो राजन्वितो वरुणानोमु
च॥ यदापोघ्न्यांध्रियावरुणेतिशापामहेततोवरुणानोमुंच॥ तदुपरिमेरुंनाममंत्रोरामा
जपेत्॥ बाह्यपरिधौ सोमादिसंनिधौ क्रमेणायुधानि सोमसन्निधौ गदा॥ ईशानसमी
पी त्रिशूलः चंद्रसमीपे वज्रं॥ अग्निसमीपे शक्तिः परमसमीपे दंडः नैरृतिसमीपे खड्गः
वरुणसमीपे पाशः वायुसमीपे अंकुशः तद्बाह्ये तत्रे गोतमः ईशाने भरद्वाजः पूर्वे।
विश्वामित्रः॥ आग्नेये कश्यपः॥ दक्षिणे जमदग्निः। नैरृते वसिष्ठः पश्चिमे अत्रिः वायव्ये

रुद्रप
२८

28

रुंधती । तत्राहो पूर्वे ऐंद्री ॥ आग्नेये कौमारी ॥ दक्षिणे ब्राह्मी । नैरृत्ये वाराही । पश्चिमे
चामुंडा वायव्ये वैष्णवी ॥ उत्तरे माहेश्वरी । ईशाने वैनायकी ॥ इत्यष्टौ शाक्तयः ॥ एताः ।
स्वस्वमंत्रैर्नाममंत्रैश्च स्थापयित्वा तत्तन्मंत्रैरेव क्रमेण पूजयित्वा तत्तन्मंत्रैर्नाममंत्रैश्च
सेकं दद्यात् दत्त्वा तिलाज्याक्षतैर्कुल्लात उपहारं निवेदयेत् ॥ क्षीरोदनं ब्रह्मणे घृतान्नमुद
कान्निमंत्रितमिन्द्राय ॥ आज्योदनमग्नये माषान्नं यमाय ॥ कृष्णव्रीघृतं भुराद्यैर्थोक्तं
निर्ऋतये नवनीतोदनं वरुणाय ॥ यवौदनं वायवे ॥ प्रियंगवोदनं सोमाय । गावीधु
कमीशानाय ॥ अत्येभ्यो यथाजातं ॥ सर्वेभ्यो वा नैवेद्यं ॥ शेषान्नेन दिग्बलिकार्य इति

रा॰ धृता
राम
२८

नकोवेष्ट्यांनवंवस्त्रंनिधाय॥ अष्टतत्त्वकर्णिकामध्यमष्टदलं विधायतत्रग्रहमंडला
निवि[illegible]लिख्यनवग्रहदेवतास्थापनंकुर्यात्॥ अत्रायंप्रयोगः॥ अद्येत्यादिग्रहपीठ
देवतास्थापनमहंकरिष्ये॥ प्रणवस्य। ब्रह्माऋषिः परमात्माग्निर्वादेवतादेवीगायत्री
छंदः॥ व्याहृतीनांक्रमेणजमदग्निरवाजस्नुर्गौऋषयः अग्निवायुसूर्यादेवताः। दे
वीगायत्रीदेवीउष्णिक्देवीबृहत्यश्छंदांसि॥ सूर्याद्यावाहनेविनियोगः। केचित्सूर्य
मंत्रेणावाहनेवाक्रुः। तत्रग्रहपीठस्यमध्येवर्तुलेद्वादशांगुलेमंडलेप्राङ्मुखंसूर्
यंरक्तपुष्पाक्षतैः॥ आकृष्णेनहिरण्यरूपः सवितात्रिष्टुप्॥ सूर्यावाहनेविनियोगः

आकृष्णेनेत्यादिः। ॐ भूर्भुवः स्वः कलिंगदेशोद्भव काश्यपसगोत्र सूर्य इहागच्छेसा
वाहा॥ ईहतिष्ठेतिस्थापयेत्॥ ततः आग्नेये चतुरस्रे चतुर्विंशांगुलेमंडले प्राङ्मुखं सो
मं श्वेतं ध्यात्वा ततः। आप्यायस्व गौतमः सोमो गायत्री॥ सोमावाहने विनियोगः॥ ॐ आप्या
यस्व। ॐ भूर्भुवः स्वः यमुनातीरोद्भवः आत्रेयसगोत्र सोम इहागच्छेसावाहा इहतिष्ठेतिस्था
पयेत्॥२॥ ततो दक्षिणे त्रिकोणे त्र्यंगुले मंडले दक्षिणाभिमुखं भौमं रक्तं ध्यात्वा ततः अग्नि
र्मूर्धा विरूपोंगारको गायत्री अंगारकावाहने विनियोगः। ॐ अग्निर्मूर्धा॥ ॐ भूर्भुवः स्वः अवं
तीसमुद्भव भारद्वाजसगोत्र भौम ईहागच्छेसावाहा ईहतिष्ठेतिस्थापयेत्॥३॥ ततः ईशा

नेबाणाकारेचतुरंगुलेमंडलेतद्दक्ष्णुस्वंबुधंपीतभूष्याह्वानेः उद्बुध्यस्वेबुधः सोमसोबु
धस्त्रिष्टुप्बुधआवाहनेविनियोगः ॥ ॐ उद्बुध्यस्व० ॐ भूर्भुवःस्वः मगधदेशोद्भवः आ
त्रेयसगोत्रबुधइहागछेत्यावाह्यइहतिष्ठेति ॥ स्थापयेत् ॥ ४ ॥ ततउत्तरतोदीर्घचतुरस्त्रे
षडंगुलेतद्दक्ष्णुस्वंबृहस्पतिंपीतभूष्याह्वानेः बृहस्पतेगृत्समदोबृहस्पतिस्त्रिष्टुप् ॥ बृह
स्पत्यावाहनेविनियोगः ॥ ॐ बृहस्पतेअति ॐ भूर्भुवःस्वः सिंधुदेशोद्भवः । आंगिरसगोत्र
बृहस्पतइहागछेत्यावाह्यइहतिष्ठेतिस्थापयेत् ॥ ५ ॥ ततः पूर्वेपंचकोणेनवांगुलेमं
डलेधाऽक्षुस्वंशुक्रंशुक्लभूष्याह्वानेः शुक्रः पाराशारः शुक्रोग्निपदाविराट्शुक्रावाह

रुद्रप
२०

30

नेविनियोगः॥ॐस्तंभकःस्तंभकानंतेॐभूर्भुवःस्वर्नोजकटदेशोद्भवनार्गवसगोत्र
स्तंभकइहागच्छेत्यावाह्यइहतिष्ठेतिस्थापयेत्॥६॥ततःपश्चिमेधनुषिषडंगुलेमंडलेपू
र्वमुखंशांतिंकृष्णपुष्पाद्यैःग्रामस्थिरिरिंबिबिःशांतिरुक्मिकन्यामावाहनेविनियो
गः॥ॐग्रामस्थि॥ॐभूर्भुवःस्वःसौराष्ट्रजन्मकाश्यपसगोत्रशांतेश्वरइहागच्छेत्यावाह्यइह
तिष्ठेतिस्थापयेत्॥७॥ततोनैर्ऋत्येसूर्पाकारेवायव्यांगुलेमंडलेदक्षिणाभिमुखंराक्षं
कृष्णपुष्पाद्यैःकायानोवामदेवराक्षगायत्री।राकायावाहनेविनियोगः॥ॐकयानःॐ राम २०
भूर्भुवःस्वःस्वाराष्ट्रीराजनाथ्रोद्भवपैठीनसिसगोत्रराक्षोइहागच्छेत्यावाह्यइहतिष्ठेति

स्थापयेत् ॥ ण ॥ ततो वायव्ये ध्वजाकारे षडंगुले दक्षिणाभिमुखं केतुं धूम्रपुष्पाक्षतैः केतुम
धुच्छंदाः केतवो गायत्री ॥ केतावाहने विनियोगः ॐ केतुं कृण्वन्न ॥ ॐ भूर्भुवः स्वः अंतर्वेदीसं
भुतब्रह्मजैमिनसगोत्राः केतवो इहागच्छत इहत्मावाघ्यं इह तिष्ठतेति स्थापयेत् ॥ ण ॥ सर्वे
वाय्वादिसाभिमुखाः स्थाप्याः ॥ अथाधिदेवताः सर्वाः श्वेतपुष्पतंडुलैः स्थापयेत् ॥ त्र्यं
बकं वसिष्ठो रुद्रो नुष्टुप्० ॥ त्र्यंबकं० ॐ भूर्भुवः स्वः ईश्वर इहागच्छेह तिष्ठेति सूर्यस्य द
क्षिणपार्श्वे ईश्वरं ॥ १ ॥ गौरिर्मिमायादीर्घतमा उमा जगती ॥ गौरीर्मिमाय० ॥ ॐ भूर्भुवः
स्वः उमे इहागच्छेह तिष्ठ सोमदक्षिणपार्श्वे उमां ॥ २ ॥ यदक्रंदो दीर्घतमाः स्कंदस्त्रिष्टु

पूयदस्कंदः ॥ ॐ भूर्भुवः स्वः स्कंदेहागच्छेह तिष्ठेति सोमदक्षिणपार्श्वे स्कंदं ॥ ३ ॥ विष्णो
दीर्घतमा विष्णुस्त्रिष्टुप् विष्णोर्नुकं ॥ ॐ भूर्भुवः स्वः विष्णो इहागच्छेह तिष्ठेति बुधदक्षि
णपार्श्वे विष्णुं ॥ ४ ॥ ब्रह्मयज्ञानं गोतमो वामदेवो ब्रह्मा त्रिष्टुप् ॥ ब्रह्मयज्ञानं ॥ ॐ भूर्भु
वः स्वः ब्रह्मन्निहागच्छेह तिष्ठेति बृहस्पतिदक्षिणपार्श्वे ब्रह्माणं ॥ ५ ॥ इंद्रं वो मधुछंदा
इंद्रो गायत्री ॥ इंद्रो वो विश्वतः ॐ भूर्भुवः स्वः इंद्रेहागच्छेह तिष्ठेति शुक्रदक्षिणपा
र्श्वे इंद्रं ॥ ६ ॥ यमाय सोमं यमो यामोनुष्टुप् यमाय सोमं ॥ ॐ भूर्भुवः स्वः यमेहागच्छेह ति
ष्ठेति शनैश्चरदक्षिणपार्श्वे यमं ॥ ७ ॥ मोषुणो घोरः काण्वः ॥ कालो गायत्री । मोषुणः प

गः ॥ ॐ भूर्भुवः स्वः काल इहागच्छेह तिष्ठेति राज्ञर्दक्षिणपार्श्वे कालं ॥ उपो वाजं त्वस्कामेवं
चित्रगुप्तोमोह वसमती ॥ उपो वाजं हि वं स्वः ॐ भूर्भुवः स्वः चित्रगुप्त इहागच्छेह तिष्ठेति के
तुदक्षिणपार्श्वे चित्रगुप्तं ॥ ५ ॥ ततः शुक्लपुष्पतण्डुलैरेव सर्वाः प्रत्यधिदेवताः स्थापयेत्
अग्निं का एवो मेधातिथिर्ऋषिर्गायत्री । अग्निं दूतं ॥ भूर्भुवः स्वः अग्ने इहागच्छेह तिष्ठेति सू
र्यवामपार्श्वे अग्निं ॥ १ ॥ अप्सु मे मेधातिथिरापोनुष्टुप् ॥ अप्सु मे सोमः ॥ ॐ भूर्भुवः स्वः आप इ
हागच्छतेह तिष्ठतेति सोमवामपार्श्वे अपः ॥ २ ॥ स्योना मेधातिथिर्भूमिर्गायत्री । ॥ स्योना
पृथिवी ॥ ॐ भूर्भुवः स्वः भूमे इहागच्छेह तिष्ठेति भौमवामपार्श्वे भूमिं ॥ ३ ॥ इदं विष्णुर्मेधा

तिथिर्विष्णुर्गायत्री० इदंविष्णु० ॐ भूर्भुवः स्वः विष्णो इहागच्छेह तिष्ठेति बुध वामपार्श्वे
विष्णुः ॥४॥ इन्द्रश्रेष्ठानि गृत्समद इन्द्रस्त्रिष्टुप्० इन्द्रश्रेष्ठानि० ॥ ॐ भूर्भुवः स्वः इन्द्र इहागच्छे
ह तिष्ठेति गुरु वामपार्श्वे इन्द्रः ॥५॥ इन्द्राणी वृषाकपिरिन्द्राणी पंक्तिः ॥ ॐ इन्द्राणीमासु
० ॐ भूर्भुवः स्वः इन्द्राणि इहागच्छेह तिष्ठेति शुक्र वामपार्श्वे इन्द्राणी ॥६॥ प्रजापतेर्हिर
ण्यगर्भः प्रजापतिस्त्रिष्टुप् ॥ प्रजापते न० ॥ ॐ भूर्भुवः स्वः प्रजापते इहागच्छेह तिष्ठेति शने
श्चर वामपार्श्वे प्रजापतिः ॥७॥ आयंगोः सार्पराज्ञी सर्पा गायत्री० आयंगोः ॐ भूर्भुवः स्वः
सर्पा इहागच्छतेह तिष्ठतेति राहु वामपार्श्वे सर्पान् ॥८॥ ब्रह्मयज्ञानं गौतमो वामदेवो ब्र

स्तात्रिष्टुप्॥ ब्रह्मजज्ञानं०॥ ॐ भूर्भुवः स्वर्ब्रह्मन्निहागच्छेह तिष्ठेति केतुवामपार्श्वे ब्र
ह्माणं॥ १॥ ततः शुक्लपुष्पतंडुलैरेव विनायकादिपंचदेवताः स्थापयेत्। गणानांत्वा
गृत्समदो गणपतिर्जगती गणानांत्वा॥ ॐ भूर्भुवः स्वर्गणपते इहागच्छेह तिष्ठेति राक्ष
सनैर्ऋते गणपतिं॥ २॥ जातवेदसे कश्यपो दुर्गा त्रिष्टुप्॥ जातवेदसे०॥ ॐ भूर्भुवः स्वर्दु
र्गे इहागच्छेह तिष्ठेति स्थाने नैर्ऋते दुर्गां॥ ३॥ तव वायो व्यश्वांगिरसो वायुर्गायत्री त
व वायवृतस्पते॥ ॐ भूर्भुवः स्वर्वायो इहागच्छेह तिष्ठेति आराहो खेरुत्तरतो वायुं॥ ४॥
आदित्यस्याकाशो गायत्री॥ आदित्यस्य॥ ॐ भूर्भुवः स्वराकाश इहागच्छेति ह तिष्ठेति

राक्षोर्दक्षिणेआकाशं॥४॥एषोत्तषाप्रस्कएवोश्विनोगायत्री०एषोत्तषा०ॐभूर्भुवःस्व
ःरश्विनाइहागच्छतमिहतिष्ठतमितिकेतोर्दक्षिणेश्विनोस्थापयेत॥५॥यक्षविनाय
कादीनांचोत्तरतएवस्थापयेत॥उत्तरेक्षेत्राधिपतिंवास्तोष्पतिंचावाहयेदिसेके॥क्षे
त्रस्यवामदेवःक्षेत्राधिपतिरनुष्टुप्॥क्षेत्रस्यपतिनावयं॥क्षेत्रएतइहागच्छेहतिष्टे
तिक्षेत्राधिपतिं॥वास्तोष्पतेवसिष्ठोवास्तोष्पतिः त्रिष्टुप्॥वास्तोष्पते॥वास्तोष्पतेइहा
गच्छेहतिष्ठेतिवास्तोष्पतिं॥ततइन्द्रादिलोकपालान्स्वर्याभिमुखान्स्थापयेत॥तत्रमंत्रा
इंद्रंविश्वाजेतामधुच्छंदसइंद्रोनुष्टुप्॥इंद्रंविश्वा०॥इंद्रइहागच्छेत्यादिपूर्ववत्

सुवसुन्नस्त्र॥ अग्निंमेधातिथिरग्निर्गायत्री॥ अग्निंदूतंयमायसोमंयमोयमोनुष्टुप्
यमायसोमं॥ ३॥ मोषुणोघोरःकण्वोनिर्ऋतिर्गायत्री॰ मोषुणःपरापरा॥ ४॥ त्वन्नोवा।
मदेवोवरुणस्त्रिष्टुप्त्वन्नोअग्नेवरुणस्य॥ तववायव्यश्वोआङ्गिरसोवायुर्गायत्री
तववायोर्ऋसोमोधेनुंगोतमः॥ सोमस्त्रिष्टुप्॥ सोमोधेनुं॥ ७॥ तमीशानंगोतमईशानो
जगती। तमीशानं॥ ततोरवेःपूर्वेशेषंस्थापयेत्नाममन्त्रेण॥ सोमस्याग्नेवासुकिं। नै
मायेतक्षकंबुधोत्तरेकर्कोटकं॥ बृहस्पतेरग्रेपद्मं॥ शुक्रोत्तरेमहापद्मं॥ शनिपश्चि
मेशंखपालं। राहोःपुरतःकंबलं। केतोःपुरतःकुलिकं। ततःपूर्वेबहिर्पूर्वसदेशाश्वि

मादिसप्तनक्षत्राणि ॥ विष्कंभादिसप्तयोगाः । बवबालवकरणे । पश्चिमे स्वात्यादिसप्त
नक्षत्राणि । वज्रादिसप्तयोगा गरवणिजे करणे । सप्तपातालानि सामवेदश्च ॥ उत्तरे अभि
जिदादिसप्तनक्षत्राणि साध्यादिषड्योगाः । विष्टिकरणं ॥ शूद्राद्याः सप्तलोकाः । अथर्ववे
दश्च वायव्ये ध्रुवः सप्तऋषयश्च ॥ तेनोपयथावकाराः गंगादिसप्तसरितः । सप्तकुलाचला
ः अष्टौ वसवः एकादशरुद्राः । द्वादशादित्याः एकोनपंचाशन्मरुतः । षोडशमातरः । ष
ट्कृत्तिकाः द्वादशमासाः द्वे अयने पंचदशतिथयः ॥ षष्टिः संवत्सराः सुपर्णाः । नागाः । स
र्पाः । यक्षाः । गंधर्वाः । विद्याधराः । अप्सरसः । रक्षांसि । भूतानि ॥ मनुष्याः । इत्येते स्थाप्या इति

अत्र च नवग्रहा एव स्थाप्या इत्येकः पक्षः । विनायकादिपंचलोकपालांतानां त्रिंशद्देवता
इत्यपरः ॥ अष्टौ दिक्पालसहिता इत्यन्यः । शेषादिमनुष्यांता एव इति वा ॥ एतेषु पक्षेषु
बहुकालव्यापीयज्ञेन फलतारतम्यं द्रष्टव्यं । ततः तदस्तु ॰ । गदाद्वै ॥ इति ग्रहप्रतिष्ठां विधाय ग्रह
जपेत्तु ॥ तत्रादौ ग्रहध्यानं ॥ नमस्सूर्याय॰ ॥ पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः । स
प्ताश्वरथसंस्थश्च द्विहस्तस्सदा रविः । श्वेतः श्वेतांबरधरो दशाश्वः श्वेतभूषणः ॥ गदा
पाणिर्द्विबाहुश्च कर्तव्यो वरदः शशी ॥ २ ॥ रक्तमाल्यांबरधरः ॥ शक्तिशूलगदाधरः । च
तुर्भुजो मेषगमो वरदः स्याद्धरासुतः ॥ ३ ॥ पीतमाल्यांबरधरः कर्णिकारसमद्युतिः । ख

ङ्गचर्मगदापाणिः सिंहस्थो वरदो बुधः ॥ ४ ॥ देवदेवमयुस्तत्र वसीतस्वेतो चतुर्भुजो दंडि
नो वरदो कार्यो साक्षसूत्रकमंडलूः ॥ ५ ॥ इंद्रनीलद्युतिः शूली वरदो ग्रध्रवाहनः ॥ बाण
बाणासनधरः कर्त्तव्योर्कसुतः सदा ॥ ६ ॥ करालवदनं खड्गचर्मशूली वरप्रदः ॥ नीलः सिं
हासनस्थश्च राहुरत्र प्रशस्यते ॥ ७ ॥ धूम्रा द्विबाहवः सर्वे गदिनो विकृताननाः ॥ गृध्रास
नगता नित्यं केतवः स्युर्वरप्रदाः ॥ ८ ॥ सर्वे किरीटिनः कार्या ग्रहालोकहितावहाः ॥ ह्यंगुले
नोछ्रिताः सर्वे शतमष्टोत्तरं सदा ॥ ९ ॥ ततः षोडशोपचारपूजा ॥ ॥ षोडशोपचारस्य पुरु
षसूक्तस्य नारायण ऋषिः पुरुषो देवता अनुष्टुप् छंदः अंत्यायास्त्रिष्टुप् षोडशोपचारपू

35

जायांविनियोगः ॥ अथन्यासः ॥ सहस्रशीर्षेतिवामकरेन्यसेत् ॥ पुरुषएवेतिद
क्षिणकरे ॥ एतावानस्येतिवामपादे ॥ त्रिपादूर्ध्वइतिदक्षिणपादे ॥ ततोविराजइति ॥ वा
मजानौ ॥ यत्पुरुषेणेतिदक्षिणजानौ ॥ तंयज्ञमितिवामकट्यां ॥ तस्माद्यज्ञात्सर्वहुत
इतिदक्षिणकट्यां ॥ तस्माद्यज्ञात्सर्वहुतऋचइतिनाभौ ॥ तस्मादश्वाइतिहृदये ॥ य
त्पुरुषमितिकंठे ॥ ब्राह्मणोस्येतिवामबाहौ ॥ चंद्रमामनसइतिदक्षिणबाहौ ॥ नाभ्याइ
त्यास्ये ॥ सप्तास्यासन्नितिनेत्रयोर्यज्ञेनेतिमूर्ध्नि ॥ ॥ अथपंचांगन्यासः ॥ ॥ ब्राह्मणो
स्येतिवाक्हृदयायनमइतिहृदये ॥ चंद्रमाइतिशिरसेस्वाहेतिशिरसि ॥ नाभ्याइति

शिखायैवषडिति शिखायां। सर्वास्त्रास्मान्निति कवचायहुं मिति कवचं॥ यज्ञेनेत्यस्त्रा
स्त्रायफडित्यस्त्रं॥ सहस्रशीर्षसावाहनं पुरुष एवेत्यासनं॥ एतावानस्येति पाद्यं॥ त्रि
पादित्यर्घं। तस्माद्विराळित्याचमनं॥ नत्न: पंचामृतस्नानं॥॥ आप्यायस्वगोतमः। पयो
गायत्री क्षीरस्नाने विनियोगः॥ आप्यायस्व। चंदनादि पंचोपचारान्दत्वा उँ दद्रुत्वः
स्वरितिहृज्ञामपवार्य॥ दधिक्राव्णो वामदेवो दध्यनुष्टुप् दधिस्नाने विनियोगः॥ द
धिक्राव्णः। पंचोपचारादि॥ घृतंमिमिक्षे गृत्समदो घृतं त्रिष्टुप्॥ घृतस्नाने विनियोगः
घृतंमिमिक्षे॥ पंचोपचारादि। मधुवाता गोतमो मधु गायत्री मधुस्नाने विनियोगः॥

मधुवातापंचोपचारादि। स्वादुःपवस्ववेगानः शार्कराजगती। शार्करास्नानेविनियो
गः। स्वादुःपवस्व॥ पंचोपचारादि॥ यन्नरूपेणेति॥ सर्वेणपुरुषसूक्तेनस्नात्वाविंशा
न्निश्वशुद्धोदकस्नानं। ततआचमनंदत्वातंयज्ञ॥ यज्ञोपवीतंपरमसितिचयज्ञोपवी
तं॥ तस्माद्यज्ञादिति॥ युवासुवासाइतिचवस्त्रं तस्माद्यज्ञात्सर्वहुतऋचइति। गंधद्वार
मिति॥ चगंधं॥ स्वद्धताश्वा। तस्मादश्वाइतिभूषणं॥ यत्पुरुषमितियोन्वमेस्वइतिचधू
पं॥ ब्राह्मणोस्यश्रियेजातइतिचदीपं॥ चंद्रमाःस्वादुपचरवेतिनैवेद्यं॥ आचमनंद
त्वानाभ्याआसीदितियाःफलिनीरितिचफलं॥ सप्तास्यासन्नितितांबूलं। यज्ञेन। हि

रुद्रप. ३७

37

रण्यरूपः हिरण्यगर्भगर्भस्थमितिच दक्षिणां ॥ नाममंत्रैः पुष्पांजलिं दत्वा प्रदक्षिणां
नमस्कारंस्तुतिंचकुर्यात् ॥ आवाहनादिषोडशोपचारपूजासंपूर्णां कुर्यात् ॥ सूरिरितिकं ॥
विधिवद्दस्तु ॥ यस्मस्मृत्वेति प्रार्थयेत् ॥ अथवा ॥ ॐ आदित्याय नमः ॥ इदमानस्तनमिसा
दि आवाहनक्रमेण प्रणवादिनमोंतैर्नाममंत्रैस्तत्रदेवस्यैवाभिषेकं पूजयेत् ॥ एता
वत्यशक्तावावाहितादिदेवतानामोनमः इतितंत्रेणवासर्वान्पूजयेत् ॥ ततोयदवेदीम
ननागेश्वरणामकालकंबविर्दध्याहतविभूषितंचंदनमालाचर्चितंकल्पशं निद
ध्यात् ॥ तद्वैवं ॥ मदीयोरितिभूमिः ॥ स्पृष्ट्वाशोपधयः स्वमितियवान्क्षिप्त्वा आक

राम ३७

कलशोषितिकलशांस्थापयेत् ॥ इमंमेगंगेतिजलेनपूरयित्वागंधद्वारामितिगंधं
क्षिपेत् ॥ याओषधीरितिसर्वौषधीः ॥ ॐ धान्यमसीतियवान् ॥ कांडात्कांडादितिदूर्वा
ः अश्वत्थेवइतिपंचपल्लवान् ॥ स्योनापृथिवीतिपंचसप्तवाम्मृदः ० याःफलिनीरिति
